## गर्तोत्तरपदाच्छः । (१३७/१३६१)

देशे इत्येव । गर्तोत्तरपदात् देशवाचिनः प्रातिपदिकात् छः प्रत्ययो भवति [1]शैषिकः । अणोऽपवादः । वाहीकग्रामलक्षणं च प्रत्ययं परत्वाद् बाधते । वृकगर्तीयम् । शृगालगर्तीयम् । [2]श्वाविद्गर्तीयम् । उत्तरपदग्रहणं [3]बहुच्पूर्वनिरासार्थम् । [4]बाहुगर्तम् ॥

## गहादिभ्यश्च । (१३८/१३६२)

गह इत्येवमादिभ्यः प्रातिपदिकेभ्यः छः प्रत्ययो भवति शैषिकः । [5]अणादेरपवादः । [6]गहीयः । अन्तःस्थीयः । देशाधिकारेऽपि संभवापेक्षं विशेषणं, न सर्वेषाम् । मध्यमध्यमं चाण् चरणे इति पठ्यते, तस्यायमर्थः । मध्यशब्दः प्रत्ययसंनियोगेन [7]मध्यममापद्यते । मध्यमीयाः । चरणे तु प्रत्ययार्थे अण्[8] भवति, माध्यमाः [9]इति । [10]तदेतद्विशेष एव स्मर्यते पृथिवीमध्यस्य मध्यमभावः । चरणसम्बन्धेन निवासलक्षणोऽण् इति च (म. भा. २. ३०१) । मुखपार्श्वतसोर्लोपश्च । मुखतीयम् । पार्श्वतीयम् । कुग्जनस्य परस्य च । जनकीयम् । परकीयम् । देवस्य चेति वक्तव्यम् । [11]देवकीयम् । वेणुकादिभ्यश्छण् वक्तव्यः । आकृतिगणोऽयम् । [12]वैणुकीयम् । वैत्रकीयम् । [13]औत्तरपदकीयम् । प्रास्थकीयम् । माध्यमकीयम् ।

गह । अन्तःस्थ । सम । विषम । 'मध्यमध्यमं चाण् चरणे' (ग. सू. ९९) । उत्तम । [14]अङ्ग । [15]वङ्ग । मगध । पूर्वपक्ष । अपरपक्ष । अधमशाख । [16]उत्तमशाख । समानशाख । एकग्राम । एकवृक्ष । एकपलाश । इष्वग्र । इष्वनी । अवस्यन्दी । कामप्रस्थ । खाडायनि । [17]कावेरणि । शैशिरि । शौङ्गि । आसुरि । आहिंसि । [18]आमित्रि । व्याडि । वैदजि । भौजि । [19]आढ्यश्वि । आनृशंसि । [20]सौवि । पारकि । अग्निशर्मन् । देवशर्मन् । [21]श्रौति । आरटकि । वाल्मीकि । क्षेमवृद्धिन् । उत्तर । [22]अन्तर । 'मुखपार्श्वतसोर्लोपः'[23] (ग. सू. १००) । 'जनपरयोः कुक्च' (ग. सू. १०१) । 'देवस्य च' (ग. सू. १०२)[24] । 'वेणुकादिभ्यश्छण्' (ग. सू. १०३) । गहादिः ॥

## प्राचां कटादेः । (१३९/१३६३)

देशे इत्येव । तद्विशेषणं [25]प्राग्ग्रहणम् । प्राग्देशवाचिनः कटादेः प्रातिपदिकात् [26]छः प्रत्ययो भवति शैषिकः । [27]अणोऽपवादः । कटनगरीयम् । [27]कटघोषीयम् । [29]कटपल्वलीयम् ॥

## राज्ञः क च । (१४०/१३६४)

असंभवाद् देशाधिकारो न विशेषणम् । राज्ञः ककारश्चा[30]न्तादेशो भवति छश्च प्रत्ययः । राजकीयम् । आदेशमात्रमिह [31]विधेयं, प्रत्ययस्तु 'वृद्धाच्छः' (४. २. ११४/१३३७) इत्येव सिद्धः ॥

---

1. शैषिकः नास्ति फ. 2. स्वाविद्गर्तीयम् इ. क, नास्ति ह. 3. बहुच् नास्ति फ. 4. बहुगर्तम् ब. क. 5. अणोऽपवादः क. 6. गहीययः क, गर्हीयः ह. 7. मध्यमभावम् फ. 8. प्रत्ययः इत्यधिकम् क. 9. इति नास्ति ब. 10. तदेकविशेषः ह. 11. देवीयम् क. 12. वैणकीयम् ब. क. 13. औतरपदीयम् क. 14. नास्ति ह. 15. दङ्ग ब. 16. उत्तमशाख समानशाख नास्ति ब. 17. कामवेरिणि ब. 18. नास्ति ब. 19. आध्यश्वि ब. 20. सौविपारकि नास्ति ब. 21. श्रैति ब. 22. अनन्तर क. 23. एकतीयं मुखतीयं पार्श्वतीयं इत्यधिकम् क. 24. देवकीयम् इत्यधिकम् क. 25. प्राचांग्रहणम् ह. 26. छण् क. 27. वाहीकलक्षण° इत्यधिकम् ह. 28. कटशासीयम् फ, नास्ति ह. 29. कटपाल्वलीयः ह. 30. च नास्ति क. 31. विधीयते फ.